**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**तृतीया परीक्षा - प्रथमपत्रिका**

**दिनाङ्कः –** ३०-१-२०२२ **अङ्काः –** १००

**पूर्वाह्णः –** १०:०० तः १:०० पर्यन्तम् **समयः –** होरात्रयम्

**ಸೂಚನೆಗಳು: ೧. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯುವ ಉತ್ತರಗಳು ದೇವನಾಗರೀ ಲಿಪಿಯಲ್ಲೇ ಇರಬೇಕು.**

**೧. ಪ್ರಶ್ನೆಗಳ ಕ್ರಮಾಂಕಗಳನ್ನು ತಪ್ಪದೇ ಬರೆಯಿರಿ.**

Instructions: 1. Write the Samskrita answers in Devanaagari script only.

2. Write the question numbers correctly.

1. **पञ्चानां संस्कृते एकवाक्येन उत्तरं लिखत ।** 5

   1. गणेशं के नमस्कुर्वन्ति ?
   2. बालिकायाः हस्ते किम् आसीत् ?
   3. अचक्षुषां चक्षुः कः ?
   4. दुर्मुखः कुत्र न्यवसत् ?
   5. वृक्षस्योपरि का स्थिता ?
   6. मल्लः कस्य सभायामाससाद ?

2. **षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 12

   1. मल्लस्य सामर्थ्यं विशदयत ।
   2. शङ्कराचार्यस्य प्रसिद्धाः शिष्याः के ?
   3. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किं चिन्तितवान् ?
   4. नरः आत्मनश्चरितं प्रत्यहं कथं प्रत्यवेक्षेत ?
   5. भूतानां प्रलयोदयौ कौ ?
   6. हनूमान् समुद्रस्योपरि किं किं चकार ?
   7. अमरशक्तेः पुत्राः के ? ते कीदृशाः ?

3. **त्रयाणां पञ्चषैः वाक्यैः संस्कृतेन उत्तरं लिखत ।** 9

   1. वायसेन किम् अनिष्टं दृष्टम् ? तत्परिणामं लिखत।
   2. विष्णोराकारः कीदृशः ? सः कैर्ध्यानगम्यः ?
   3. गोप्यानि कानि ?
   4. द्रोणः एकलव्याय किमुत्तरं प्रायच्छत् ?

4. **चतुर्णां मातृभाषया दशभि: वाक्यै: उत्तरं लिखत ।** **12**

1. एकलव्यः तस्य गुरुभक्तिं कथं दर्शितवान् ?
2. “मल्लस्य कथा” विशदयत ।
3. “मत्पुत्रेण स्वकर्मणः फलम् अनुभूतम्” कस्य पुत्रः ? किमभवत् ?
4. “चित्रग्रीवकथा” सङ्गृह्य लिखत ।
5. “पतिव्रतायाः माहात्म्यम्” विवृणुत ।

1. **चतुर्णां ससन्दर्भं मातृभाषया विवृणुत ।** **12**

1. "राजन् पूरिता मया समस्या।“
2. “सर्वस्यापि धर्मकार्यस्य शरीरमेव साधनम्।“
3. "त्वां लोकोत्तरं धनुर्धरं करिष्यामि।“
4. “भर्ता मे महद्दैवतम्”।
5. "न हि कृतमुपकारं साधवो विस्मरन्ति" ।

6. **द्वयो: अन्वयानुसारम् अर्थं मातृभाषया लिखत ।** **4**

1. निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात् पथः प्रविचलन्ति पदं न धीराः॥

2. प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः । किं नु मे पशुभिस्तुल्यं किं नु सत्पुरुषैरिति॥

3. मा विषादं कृथा देवि राघवो रावणं रणे। हत्वा त्वां नेष्यतीत्येनाम् आश्वास्य स विनिर्ययौ॥

7. **श्लोकद्वयं पूरयत ।** **4**

1. दोर्भिर्युक्ता ---------------सुप्रसन्ना ॥ 2.प्रथमवयसि -----------विस्मरन्ति ॥

3 . रविनिशाकर --------------- मतिः ॥

**8. अस्य गद्यस्य अनुवादं कुरुत।** **3**

तस्मिन्नेव समये चित्रग्रीवनामा कपोतराजः सपरिवारः वियति विसर्पन् तण्डुलकणान् अवलोकायामास। ततः स चित्रग्रीवः तण्डुलकणलुब्धान् कपोतान् प्रत्याह – " कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः ? भद्रमिदं न पश्यामि। सम्यक् निरूप्यतां तावत्। सर्वथा अविचार्य कर्म न कर्तव्यम्" इति।

**9. रिक्तस्थानानि पूरयत।** **3**

1. नूनं -----वल्मीकः। 2. शङ्कराचार्यस्य पिता -------। 3. हस्ते किं ते? ------।

**10. त्रयाणां पर्यायपदानि लिखत।** **3**

1. भूमिः 2. शिशुः 3. अनुपदम् 4. द्विजः

**11. त्रयाणां विरुद्धपदानि लिखत।** **3**

1. क्षीयते 2. सूक्ष्मः 3. शाश्वतः 4. प्रकाशः

**12. त्रीणि पदानि संस्कृतवाक्येषु योजयत।** **3**

1. अकरोत् 2. दृष्ट्वा 3. भूसुरः 4. विशालः

13. त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत। 3

1. रावणोऽथ 2. इत्येनाम् 3. समुद्रस्योपरि 4. अद्यैव

**14. वाक्यदोषं परिहरत। (त्रयाणामेव)** **3**

1. भवान् कार्यं कुरु। 2. रामं सह सीता अपि गच्छति।

3. वयं अद्य एव गच्छावः। 4. गुरुं नमः।

**15. सुबन्त-तिङन्त-अव्ययानि पृथक् कृत्वा लिखत।** **3**

1. अथ द्वितीयदिने तस्य पिता समायातः। 2. अनुपदमेव गुरुकुलं गत्वा सः वेदान् अधीतवान्। 3. कथम् इमे गिरिम् उद्धर्तुं शक्नुयुः?

**16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत। (द्वयोः)** **4**

1. यादृशं --------तादृशी। **2.** स्निग्ध -----------भवति। **3.** चक्रा-----------पङ्क्तिः।

**17. संयोज्य लिखत।** **4**

| **अ** | **आ** |
|---|---|
| 1. कारयामास | लट् |
| 2. अवदत् | लिट् |
| 3. वदिष्यामि | लोट् |
| 4. उद्यताम् | लङ् |
| | लृट् |

**18. व्याकरणविशेषं लिखत।** **2**

**1. सर्पराजः** **2. गच्छति स्म**

**19. रेखाङ्कितमधिकृत्य प्रश्नवाक्यं कुरुत।** **2**

1. तस्य <u>त्रयः</u> पुत्राः आसन्। 2. <u>ब्राह्मणसुतेन</u> पूजा न कृता।

**20. समूहेतरपदं पृथक् कृत्वा लिखत।** **2**

1. भवतु पश्य लभावहे कुर्वन्तु। 2. व्याधः कपोतः वायसः शुकः

**21. चतुर्थपदं लिखत।** **2**

1. ददर्श – ददृशुः :: अयाचत – ----- 2. मरुतः – मारुति :: दशरथः – -------

**22. प्रयोगपरिवर्तनं कुरुत।** **2**

1. अहं पठामि। 2. तेन कार्यं कर्तुं शक्यते।

------------------